|| દ્વિતીયોઽધ્યાયઃ ||

શ્રૌતસ્મૃતિવિરુદ્ધત્વાત સ્મૃતયો ન ગુણાન હરેઃ |
નિષેદ્ધું શક્નુયુર્વેદા નિત્યત્વાન્માનમુત્તમમ || ૧ ||

દેવતાવચનાદાપો વદંતીત્યાદિકં વચઃ |
નાયુક્તવાદ્યસન્નૈવ કારણં દૃશ્યતે ક્વચિત || ૨ ||

અસજ્જીવપ્રધાનાદિશબ્દા બ્રહ્મૈવ નાપરમ |
વદંતિ કારણત્વેન ક્વાપિ પૂર્ણગુણો હરિઃ || ૩ ||

સ્વાતંત્ર્યાત સર્વકર્તૃત્વાન્નાયુક્તં તદ્વદેચ્છ્રુતિઃ |
ભ્રાંતિમૂલતયા સર્વસમયાનામયુક્તિતઃ || ૪ ||

ન તદ્વિરોધાદ્વચનં વૈદિકં શંક્યતાં વ્રજેત |
આકાશાદિસમસ્તં ચ તજ્જં તેનૈવ લીયતે || ૫ ||

સોઽનુત્પત્તિલયઃ કર્તા જીવસ્તદ્વશગઃ સદા |
સદાભાસો હરિઃ સર્વરૂપેષ્વપિ સમઃ સદા || ૬ ||

www.yousigma.com

મુખ્યપ્રાણશ્ચેંદ્રિયાણિ દેહશ્ચૈવ તદુદ્ભવઃ |
મુખ્યપ્રાણવશે સર્વં સ વિષ્ણોર્વશગઃ સદા || ૭ ||

સર્વદોષોજ્ઝિતસ્તસ્માદ્ભગવાન પુરુષોત્તમઃ |
ઉક્તા ગુણાશ્ચાવિરુદ્ધાસ્તસ્ય વેદેન સર્વશઃ || ૮ ||

|| ઇતિ શ્રીમદાનંદતીર્થભગવત્પાદાચાર્યવિરચિત બ્રહ્મસૂત્રાણુભાષ્યે
દ્વિતીયોऽધ્યાયઃ ||

www.yousigma.com